# Subrahmanya Shadaksharashtottarashatanamastotram

# સુબ્રહ્મણ્યષડક્ષરાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : subrahmaNyaShaDakSharAShTottarashatanAmastotram

File name : subrahmaNyaShaDakSharAShTottarashatanAmastotram.itx

Category : subrahmanya, aShTottarashatanAma

Location : doc_subrahmanya

Transliterated by : Mahaperiaval trust

Proofread by : Preeti N Bhandare

Description-comments : Subramanya Sthuthi Manjari, Ed. S.V.Radhakrishna Sastri. See corresponding nAmAvalI

Latest update : April 30, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 30, 2021

*sanskritdocuments.org*

# સુબ્રહ્મણ્યષડક્ષરાષ્ટોત્તરશતનામસ્તોત્રમ્

શરણ્યઃ શર્વતનયઃ શર્વાણીપ્રિયનન્દનઃ ।
શરકાનનસમ્ભૂતઃ શર્વરીશમુખઃ શમઃ ॥ ૧॥

શઙ્કરઃ શરણત્રાતા શશાઙ્કમુકુટોજ્જ્વલઃ ।
શર્મદઃ શઙ્ખકણ્ઠશ્ચ શરકાર્મુકહેતિભૃત્ ॥ ૨॥

શક્તિધારી શક્તિકરઃ શતકોટ્યર્કપાટલઃ ।
શમદઃ શતરુદ્રસ્થઃ શતમન્મથવિગ્રહઃ ॥ ૩॥

રણાગ્રણિ રક્ષણકૃદ્રક્ષોબલવિમર્દનઃ ।
રહસ્યજ્ઞો રતિકરો રક્તચન્દનલેપનઃ ॥ ૪॥

રત્નધારી રત્નભૂષો રત્નકુણ્ડલમણ્ડિતઃ ।
રક્તામ્બરો રમ્યમુખો રવિચન્દ્રાગ્નિલોચનઃ ॥ ૫॥

રમાકલત્રજામાતા રહસ્યો રઘુપૂજિતઃ ।
રસકોણાન્ત રાલસ્થો રજોમૂર્તી રતિપ્રદઃ ॥ ૬॥

વસુદો વટુરૂપશ્ચ વસન્તઋતુપૂજિતઃ ।
વલવૈરિસુતાનાથો વનજાક્ષો વરાકૃતિઃ ॥ ૭॥

વક્રતુણ્ડાનુજો વત્સો વરદાભયહસ્તકઃ ।
વત્સલો વર્ષકારશ્ચ વસિષ્ઠાદિપ્રપૂજિતઃ ॥ ૮॥

વણિગ્રૂપો વરેણ્યશ્ચ વર્ણાશ્રમવિધાયકઃ ।
વરદો વજ્રભૃદ્વન્દ્યો વન્દારુજનવત્સલઃ ॥ ૯॥

નકારરૂપો નલિનો નકારયુતમન્ત્રકઃ ।
નકારવર્ણનિલયો નન્દનો નન્દિવન્દિતઃ ॥ ૧૦॥

નટેશપુત્રો નમ્રભ્રૂર્નક્ષત્ર ગ્રહનાયકઃ ।
નગાગ્રનિલયો નમ્યો નમદ્ભક્તફલપ્રદઃ ॥ ૧૧॥

નવનાગો નગહરો નવગ્રહસુવન્દિતઃ ।
નવવીરાગ્રજો નવ્યો નમસ્કારસ્તુતિપ્રિયઃ ॥ ૧૨॥

ભદ્રપ્રદશ્ચ ભગવાન્ ભવારણ્યદવાનલઃ ।
ભવોદ્ભવો ભદ્રમૂર્તિર્ભર્ત્સિતાસુરમણ્ડલઃ ॥ ૧૩॥

ભયાપહો ભર્ગરૂપો ભક્તાભીષ્ટફલપ્રદઃ ।
ભક્તિગમ્યો ભક્તનિધિર્ભયક્લેશ વિમોચનઃ ॥ ૧૪॥

ભરતાગમસુપ્રીતો ભક્તો ભક્તાર્તિભઞ્જનઃ ।
ભયકૃદ્ભરતારાધ્યો ભરદ્વાજઋષિસ્તુતઃ ॥ ૧૫॥

વરુણો વરુણારાધ્યો વલારાતિ મુખસ્તુતઃ ।
વજ્રશક્ત્યાયુધોપેતો વરો વક્ષઃ સ્થલોજ્જ્વલઃ ॥ ૧૬॥

વસ્તુરૂપો વશિધ્યેયો વલિત્રય વિરાજિતઃ ।
વક્રાલકો વલયધૃત્ વલત્પીતામ્બરોજ્જ્વલઃ ॥ ૧૭॥

વચોરૂપો વચનદો વચોઽતીતચરિત્રકઃ ।
વરદો વશ્યફલદો વલ્લીદેવીમનોહરઃ ॥ ૧૮॥

ઇતિ સુબ્રહ્મણ્યષડક્ષરાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Preeti N Bhandare

*Subrahmanya Shadaksharashtottarashatanamastotram*

pdf was typeset on April 30, 2021

Please send corrections to *sanskrit@cheerful.com*